"न स्नानमाचरेद्भुक्त्वा नातुरो न महानिशि।
न वासोभिः सहाजस्रं नाविज्ञाते जलाशये॥"
जलं आशेते तिष्ठत्यत्र। आ+शी+"पुंसि संज्ञायां घः प्रायेण।" ३।३।११८। इति घः।) समुद्रः। इति हेमचन्द्रः॥ शृङ्गाटकः। इति राजनिर्घण्टः॥

जलाशया, स्त्री, (जले जलसमीपे आशेते उद्भवतीति। आ+शी+अच्। स्त्रियां टाप्।) गुण्डालातृणः। इति राजनिर्घण्टः॥

जलाश्रयः, पुं, (जले जलप्रचुरप्रदेशे आश्रय उत्पत्तिस्थानं यस्य।) वृत्तगुण्डतृणम्। इति राजनिर्घण्टः॥

जलाश्रया, स्त्री, (जले जलबहुलप्रदेशे आश्रयो यस्याः।) शूलीतृणम्। बलाका। इति राजनिर्घण्टः॥

जलाह्लीला, स्त्री, (जलेनाह्लीला संवृता।) पुष्करिणी। इति हारावली। ४२॥

जलाह्वयं, क्ली, (जले आह्वयः संज्ञा यस्य।) उत्पलम्। इति राजनिर्घण्टः॥

जलिका, स्त्री, (जलं उत्पत्तिस्थानत्वेनास्त्यस्याः। जल+"अत इनिठनौ।" ५।२।११५। इति ठन् स्त्रियां टाप्।) जलौका। इत्यमरटीकायां भरतः॥

जलुका, स्त्री, (जले तिष्ठतीति। जल+बाहुलकात् उकः।) जलौका। इति शब्दरत्नावली॥

जलूका, स्त्री, (जलुका। पृषोदरादित्वात् दीर्घः।) जलौका। इति हेमचन्द्रः। ४। २७०॥ (यथा, देवीभागवते। १। १५। १८।
"जलूकेव सदा नारी रुधिरं पिबतीति वै।
मूर्खस्तु न विजानाति मोहितो भावचेष्टितैः॥")

जलेचरः, पुं, (जले चरतीति। चर+"चरेष्टः।" ३।२।१६। इति टः। "तत्पुरुषे कृति बहुलम्।" ६।३।१४। इत्यलुक्।) जलचरपक्षी। स तु हंसमद्गुबकादिः। तस्य मांसगुणाः। गुरुत्वम्। उष्णत्वम्। स्निग्धत्वम्। मधुरत्वम्। वायुनाशित्वम्। शुक्रकारित्वञ्च। इति राजवल्लभः॥ (जलचारिणि, त्रि। यथा, महाभारते। १। २१७। ११।
"स तमादाय कौन्तेयो विस्फुरन्तं जलेचरम्।
उदतिष्ठन्महाबाहुर्बलेन बलिनां वरः॥")

जलेच्छया, स्त्री, (जलमेतीति जलेत् जलप्रचुरस्थानम्। इ+क्विप्। तत्र शेते उद्भवतीति। शी+अच्। स्त्रियां टाप्।) हस्तिशुण्डावृक्षः। इति शब्दरत्नावली॥

जलेजातं, क्ली, (जले जातमुत्पन्नम्।) पद्मम्। इति शब्दरत्नावली॥

जलेन्द्रः, पुं, (जलस्य इन्द्रः अधिपतिः।) वरुणः। महोदधिः। जम्भलः। इति मेदिनी। रे, १५८॥

जलेन्धनः, पुं, (जलान्येव इन्धनानि यस्य।) वाडवाग्निः। इति भूरिप्रयोगः॥

जलेरुहा, स्त्री, (जले रोहति उद्भवतीति। रुह+कः। "तत्पुरुषे कृतीति।" अलुक्।) कुटुम्बिनीवृक्षः। इति राजनिर्घण्टः॥

जलेवाहः, पुं, (जले जलमध्ये वाहते जलमग्नद्रव्यस्य लाभार्थं प्रयतते इति। वाह प्रयत्ने+अच्।) जातिविशेषः। डुबरु इति भाषा॥ यथा, पाद्मे पातालखण्डे।
"जलेवाहानथाहूय बहूंस्तत्र न्ययोजयत्।
तत् कृत्वा परमं यत्नमापुराभरणं न तत्॥"

जलेशयः, पुं, (जले शेते इति। शी+अच्। "तत्पुरुषे कृतीति।" अलुक्।) मत्स्यः। इति त्रिकाण्डशेषः॥ (कारणतोयशायित्वात् विष्णुः। यथा, हरिवंशे। २२। ६८।
"नमोऽस्त्वनन्तपतये अव्ययाय महात्मने।
जलेशयाय देवाय पद्मनाभाय विष्णवे॥"
महादेवः। यथा, महाभारते। १३। १७। ६८।
"तुम्बवीणो महाक्रोध ऊर्द्ध्वरेता जलेशयः॥"
जलशायिनि, त्रि॥)

जलेश्वरः, पुं, (जलस्य ईश्वरः।) वरुणः। इति शब्दरत्नावली॥ (यथा, महाभारते। १। २२६। ३।
"तमब्रवीत् धूमकेतुः प्रतिगृह्य जलेश्वरम्।
चतुर्थं लोकपालानां देवदेवं सनातनम्॥"
जलानामाश्रयत्वात्) समुद्रश्च॥

जलोका, स्त्री, (जलमोकं आश्रयो यस्याः। पृषोदरादित्वात् साधुः।) जलौका। इत्यमरटीकायां भरतः॥

जलोच्छ्वासः, पुं, (जलानां उच्छ्वासः।) जलाशयं परिपूर्य्य समधिकजलस्य सर्व्वतो वहनम्। इति केकटः॥ समधिकजलस्योपायैर्निष्कासनम्। इति स्वामी॥ जलाशयचये पुष्करिण्यादावुपायेन जलनिष्कासनम्। इति सर्व्वस्वम्॥ सेतुभङ्गादिभयेन जलाशयादुपायैर्जलवहिष्करणम्। इत्यन्ये॥ पुष्करिण्यादौ जलप्रवेशार्थमुपायः सुयान् इति ख्यात इत्येके। इति भरतः॥ तत्पर्य्यायः। परीवाहः२। इत्यमरः।१।१०।१०॥

जलोदरं, क्ली, (जलप्रधानं उदरं यस्मात्।) जठरामयः। तस्य निदानादि यथा,—
"यः स्नेहपीतोऽप्यनुवासितो वा
वान्तो विरिक्तोऽप्यथवा निरूढः।
पिबेज्जलं शीतलमाशु तस्य
स्रोतांसि दुष्यन्ति हि तद्वहानि॥
स्नेहोपलिप्तेष्वथवापि तेषु
दकोदरं पूर्व्ववदभ्युपैति।
स्निग्धं महत्तत् परिवृत्तनाभि-
समाततं पूर्णमिवाम्बुना च॥
यथा दृतिः क्षुभ्यति कम्पते च
शब्दायते चापि दकोदरन्तत्॥
जन्मनैवोदरं सर्व्वं प्रायः कृच्छ्रतमं मतम्।
बलिनस्तदजाताम्बु यत्नसाध्यं नवोत्थितम्॥"
इति माधवकरः॥

(अस्य सकारणलक्षणचिकित्सितं यथा, हारीते चिकित्सितस्थाने २७ अध्याये।
आत्रेय उवाच।
"विषमाशनोपवेशात् पीततोयादथापि वा।
श्रमाध्वश्वासनिष्क्रान्तादतिव्यायामतोऽपि वा॥
पीतन्तूदरमेवञ्च तस्माज्जातं जलोदरम्।
उदरं सजलं यस्य सशोथमतिवर्द्धितम्॥
श्वयथुः पादयोः शोथो जलोदरस्य लक्षणम्।
विरेकं वमनं कुर्य्यात् पाचनानि च कारयेत्॥
क्षारयोगश्च वटकस्तेन तदुपशाम्यति।
तस्मान्नाभेर्वलीभागे वञ्चयित्वाङ्गुलद्वयम्॥
जलनाडीश्वाशुमत्य कुशपत्रेण वेधयेत्।
शरखण्डनलनालञ्च तत्र मध्ये निधापयेद्बुधः॥
अन्तर्गतं जलं स्राव्यं ततः सन्धारयेद्द्रुतम्।
यदा न धरते तच्च तदा दाहः प्रशस्यते॥
कृत्वा कल्कं परिस्राव्य घृतं देयं चतुर्गुणम्।
शुण्ठी विषा समं मार्घ्यं पानमालेपनं हितम्॥
शस्त्रकर्म्म भिषक् श्रेष्ठो विज्ञातेनैव कारयेत्।
दुष्करं शस्त्रकर्म्मैव न कुर्य्याद् यत्र तत्र तु॥
अक्रियायां ध्रुवो मृत्युः क्रियायां संशयो भवेत्।
तस्मादवश्यकर्त्तव्यमीश्वरं साधिकारिणा॥")

जलोद्भवा, स्त्री, (जले उद्भवो यस्याः।) लघुब्राह्मी। इति राजनिर्घण्टः॥ (कालानुसारिवा। शिउली छोपरं इति च यस्य ख्यातिः। यथास्याः पर्य्यायाः।
"शीतली शीतकुम्भी च शुक्लपुष्पा जलोद्भवा।
कालानुसारिवा तस्याः प्रवाहो नतवद्गुणैः॥"
इति वैद्यकरत्नमालायाम्॥)

जलोद्भूता, स्त्री, (जले उद्भूता।) गुण्डालाक्षुपः। इति राजनिर्घण्टः॥

जलोरगी, स्त्री, (जले उरगी सर्पिणीव।) जलौका। इत्यमरटीकासारसुन्दरी॥

जलौकसः, स्त्री, (जले ओको वासस्थानं यासाम्।) जलौका। सान्तबहुवचनान्तोऽयं शब्दः। इत्यमरः। १। १०। २२॥

जलौकसः, पुं, स्त्री, (जलमेव ओको वासस्थानं तदस्त्यस्येति। अर्श आदित्वादच्।) जलौका। इत्यमरटीकायां रायमुकुटः॥ अकारान्तोऽयम्॥

जलौकाः, [स्] स्त्री, (जलमेव ओको वसतिस्थानं यस्याः।) जलौका। इति भरतः॥ (यदुक्तम्।
"गृह्णाति साधुरपरस्य गुणं न दोषं
दोषान्वितो गुणिगुणं परिहाय दोषम्।
बालस्तनात् पिबति दुग्धमसृग्विहाय
त्यक्त्वा पयो रुधिरमेव न किं जलौकाः॥"
जलवासिनि, त्रि। यथा, महाभारते। १३। ५०। १०।
"जलौकसां स सत्त्वानां बभूव प्रियदर्शनः॥"
विवरणमस्या यथा,—
"नृपाढ्य-बाल-स्थविर-भीरु-दुर्ब्बल-नारीसुकुमाराणामनुग्रहार्थं परमसुकुमारोऽयं शोणितावसेचनोपायोऽभिहितो जलौकसः। तत्र वातपित्तकफ-दुष्ट-शोणितं यथासङ्ख्यं शृङ्ग-जलौकालाबुभिरवसेचयेत् स्निग्धशीतरूक्षत्वात् सर्व्वाणि सर्व्वैर्वा॥"
"उष्णं समधुरं स्निग्धं गवां शृङ्गं प्रकीर्त्तितम्।
तस्माद्वातोपसृष्टे तु हितं तदवसेचने॥
शीताधिवासा मधुरा जलौका वारिसम्भवा।